# Shri Hanumat ProktamantrarAjAtmakaH Ramastavah

# શ્રીહનુમત્પ્રોક્તમન્ત્રરાજાત્મકઃ રામસ્તવઃ

## Document Information

Text title : shrIhanumatproktamantrarAjAtmaka rAmastavaH 2

File name : mantrarAjAtmakaHrAmastavaH.itx

Category : stavarAja, raama

Location : doc_raama

Author : Hanuman

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : hanumatkalpe, Goraksha Nikhil Vani page 24 2065_12

Latest update : April 23, 2005

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 15, 2022

*sanskritdocuments.org*

# શ્રીહનુમત્પ્રોક્તમન્ત્રરાજાત્મકઃ રામસ્તવઃ

શ્રીગણેશાય નમઃ ।
ૐ ઉગ્રં વીરં મહાવિષ્ણું જ્વલન્તં સર્વતોમુખમ્ ।
નૃસિંહં ભીષણં ભદ્રં મૃત્યુમૃત્યુ નમામ્યહમ્ ॥

હનુમાનુવાચ ।
તિરશ્ચામપિ યો રાજા સમવાયં સમીયુષામ્ ।
તથા સુગ્રીવમુખ્યાનાં યસ્તં વન્દ્યં નમામ્યહમ્ ॥ ૧॥

સકૃદેવ પ્રસન્નાય વિશિષ્ટાયૈવ રાજ્યદઃ ।
વિભીષણાય યો દેવસ્તં વીરં પ્રણમામ્યહમ્ ॥ ૨॥

યો મહાપુરુષો વ્યાપી મહાબ્ધૌ કૃતસેતુકઃ ।
સ્તુતો યેન જટાયુશ્ચ મહાવિષ્ણું નમામ્યહમ્ ॥ ૩॥

તેજસાપ્યાયિતા યસ્ય જ્વલન્તિ જ્વલનાદયઃ ।
પ્રકાશતે સ્વતન્ત્રો યસ્તં જ્વલન્તં નમામ્યહમ્ ॥ ૪॥

સર્વતોમુખતા યેન લીલયા દર્શિતા રણે ।
રાક્ષસેશ્વરયોધાનાં તં વન્દે સર્વતોમુખમ્ ॥ ૫॥

નૃભાવં તુ પ્રપન્નાનાં હિનસ્તિ ચ સદા રુજમ્ ।
નૃસિંહતનુમપ્રાપ્તો યસ્તં નૃસિંહં નમામ્યહમ્ ॥ ૬॥

યસ્માદ્વિભ્યતિ વાતાર્કજ્વલનેન્દ્રાઃ સમૃત્યવઃ ।
ભયં તનોતિ પાપાનાં ભીષણં તં નમામ્યહમ્ ॥ ૭॥

પરસ્ય યોગ્યતાં વીક્ષ્ય હરતે પાપસન્તતિમ્ ।
પુરસ્ય યોગ્યતાં વીક્ષ્ય તં ભદ્રં પ્રણમામ્યહમ્ ॥ ૮॥

યો મૃત્યું નિજદાસાનાં મારયત્યતિચેષ્ટદઃ ।
તત્રાપિ નિજદાસાર્થં મૃત્યુમૃત્યું નમામ્યહમ્ ॥ ૯॥

યત્પાદપદ્મપ્રણતો ભવત્યુત્તમપુરુષઃ ।
તમીશં સર્વદેવાનાં નમનીયં નમામ્યહમ્ ॥ ૧૦॥

આત્મભાવં સમુત્ક્ષિપ્ય દાસ્યં ચૈવ રઘુત્તમમ્ ।
ભજેઽહં પ્રત્યહં રામં સસીતં સહલક્ષ્મણમ્ ॥ ૧૧॥

નિત્યં શ્રીરામભક્તસ્ય કિઙ્કરા યમકિઙ્કરાઃ ।
શિવવત્યો દિશસ્તસ્ય સિદ્ધયસ્તસ્ય દાસિકાઃ ॥ ૧૨॥

ઇદં હનુમતા પ્રોક્તં મન્ત્રરાજાત્મકં સ્તવમ્ ।
પઠેદનુદિનં યસ્તુ સ રામે ભક્તિમાન્ભવેત્ ॥ ૧૩॥

॥ ઇતિ હનુમત્કલ્પે શ્રીહનુમન્મન્ત્રરાજાત્મકસ્તવરાજઃ સમ્પૂર્ણઃ ॥

શ્રીહનુમત્પ્રોક્તમન્ત્રરાજાત્મકઃ રામસ્તવઃ

Notice that words in the first verse are strewn
in the end of other verses.
Encoded and Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

---

*Shri Hanumat ProktamantrarAjAtmakaH Ramastavah*
pdf was typeset on October 15, 2022

Please send corrections to *sanskrit@cheerful.com*